अथशिशुबोधः ।

पालिवंशावतंस मैथिल पण्डित-

श्री कलाधर शर्म्मविरचितः ।

उपाध्यायोपनामकेन प० श्री मुकुन्द शर्म्मणा

संशोधितः ।

द[illegible] राजधान्याम्

श्रीमोतीरा[illegible] रामेश्वरलालाभ्यांस्वकीये

श्री [illegible]मेश्वरनाम्नि

यन्त्रालये श्री[illegible] द्र शर्म्मद्वारा

मुद्राप्यप्रका[illegible]तः ।

प्रथमावृत्तिः । सम्[illegible] १९६६ ।

(अयंग्रन्थोराजकीयनियमानुसारे[illegible] [illegible]त्रा ऽ-

साधारणीकृत[illegible]

अथ शिशुबोधः

श्री गणेशायनमः ॥ भास्करञ्च प्रणम्यादौ शङ्करञ्च गजाननम् । करोमि बालबोधायशिशुबोधमविस्तरम् ॥ १ ॥ तत्रादौ तिथिनामानि ॥ प्रतिपच्चद्वितीयाच तृतीया तदनन्तरम् । चतुर्थी पञ्चमीषष्ठी सप्तमीचाष्टमी ततः । नवमी दशमीचैवैकादशी द्वादशी ततः । त्रयोदशी ततः प्रोक्ता ततो ज्ञेया चतुर्द्दशी । पूर्णिमाशुक्लपक्षेऽन्त्या कृष्णपक्षेत्वमास्मृता ॥ अथवाराः ॥ रविशशिकुज बुध गुरु सित शनयो वाराः प्रकीर्त्तिताः क्रमशः । ते राहु केतुसहिता नवग्रहाः कीर्त्तितास्तज्ज्ञैः ॥ अथ नक्षत्राणि । अश्विनीभरणीचैव कृत्तिकारोहिणी मृगः । आर्द्रा पुनर्वसुः पुष्यस्तथाश्लेषामघा ततः । पूर्वा फल्गुनिका तस्मादुत्तरा फल्गुनी ततः । हस्तश्चित्रा तथास्वाती विशाखातदनन्तरम् । अनुराधा ततः ज्येष्ठा ततो

.. । पूर्वाषाढोत्तराषाढात्वभिजिच्छ्रवण
.. । धनिष्ठाशततारारव्यं पूर्वभाद्रपदाततः । उ-
त्तराभाद्रपाश्चैव रेवत्येतानिभानिच ॥ अथरा.शयः ।
मेषोवृषोनृयुक्कर्कःसिंहकन्यातुलालयः । धनुर्मृगोघटो
मीनो राशिनामान्यनुक्रमात् ॥ अथयोगाः । वि-
ष्कम्भः प्रीतिरायुष्मान्सौभाग्यः शोभनस्तथा । अति-
गण्डः सुकर्म्माच धृतिः शूलस्तथैवच । गण्डोवृद्धि-
र्ध्रुवश्चैव व्याघातोहर्षणस्तथा । वज्रंसिद्धिर्व्यतीपातो-
वरीयान्परिघः शिवः । सिद्धिः साध्यः शुभः शुक्लो
ब्रह्मेन्द्रोवैधृतिः क्रमात् ॥ अथ नक्षत्रस्वामिनः ।
अश्वो यमो नलोब्रह्मा शशीरुद्रोऽदितिर्गुरुः । सर्पश्च
पितरश्चैव भगार्यमदि..करः । त्वष्टावातः कृशा-
न्विन्द्रोमित्रश्चैव पुर..रः । निर्ऋतिः सलिलश्चैव वि-
श्वेदेवाविधिर्हरिः । वंसवोवरुणश्चैव तथाजचरणा-
ह्वयः । अहिर्बुन्ध्यस्तथापूषाक्रमान्नक्षत्रदेवताः ॥
अथशतपदचक्रसारोद्धारः । चुचेचोलाः पदेष्वाद्येलि
लुलेलोयम ..भे । अइउएइमेऽश्वभें ओ वाविवु तथाकभे ॥

वेवोकाकि मृगेख्याताः कुघङ छास्तुरौद्रभे पूर्वार्द्ध हित्वादितिभे हुहेहोढाश्चपुष्यभे। डिडुडेडो इमेसार्पमभिमुमेमघाभिधे। मोटाटिटुभगेख्याताष्टेटोपप्र्यर्यमर्क्षके। पुषणठास्तथाहस्ते पेपोररीतिचित्रभे। रुरेरोतास्तथास्वातौ तितुतेतो द्विदैवभे(१)। ननिनुने क्रमान्मैत्रे नोयायियु इतीन्दुभे। येयोभभीतिमूलाख्ये भुधफढाजलस्यभे। भेभोजजीतिविश्वर्क्षे जुजेजोखाभिजिद्भवेत्। खिखुखेखोश्रुतौज्ञेया गगिगुगेचवासवे। गो सासिसुजलेशर्क्षे सेसोददीत्यजाङ्घ्रिभे। दुथझञास्तथोपान्त्ये देदो चचीतिपौष्णभे(२)॥ अथनक्षत्राणां

---

(१) द्वयोर्नक्षत्रयोर्देवो द्विदेवइन्द्रस्तस्यभंविशाखाऽत्रतस्मिन् सहि विशाखामूलयोः स्वामी॥

(२) अत्रेदंबोध्यम्। नप्रोक्ताङञणावर्णानामादौसन्तिलेनाहि। चेद्भवन्तितदाज्ञेयागजडास्तेयथाक्रमम्॥ इति स्वरोदयकृद्भिः ङञणवर्णानां गजडवर्णैः साम्यकथनात् ङकारादि

कराख्योऽगः ॥ अश्विनीभरणीसर्वा कृत्तिका प्र-
थमांघ्रिकम् । मेषः स्यात्कृत्तिकापादत्रितयं रोहि-
णीतथा ॥ वृषभोमृगपूर्वार्द्धंतदन्त्यार्द्धं तथार्द्रभम् ।
पादत्रयंपुनर्वस्वोः सराशिर्मिथुनाभिधः ॥ तदन्त्योऽ
ङ्घ्रिस्तथापुष्योह्यश्लेषा कर्कटाभिधः । मघापूर्वोत्तरा

नक्षत्रचरणोत्पन्नशिशूनांगकाराद्यक्षरंनामधार्यमिति प्राचां व्याख्यानंभ्रममूलकं तथासति आर्द्रातृतीय चरणेलब्ध जन्मनो धनिष्ठा प्रथम चरणजत्वभ्रमप्रसक्तेः । एवमन्यत्रापिबोध्यम् । उक्तश्लोकस्तुवर्णस्वरज्ञानविषयः । 'तस्माच्चन्द्रताराविज्ञानाय तन्नक्षत्रीयैः कैश्चिदपिवर्णैर्व्यवहृतनामाद्यक्षरैर्यथाशास्त्रकुला-चारं नामकार्य्यम् । शास्त्रन्तु " घोषवदाद्यन्तरन्तःस्थम-वृद्धं त्रिपुरुषानूकमनारिप्रतिष्ठितं तद्धिप्रतिष्ठिततमंभवति द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्य्यान्नतद्धितमिति " महाभाष्यपरि गृहीतंवचनम् ॥ संयुक्ताक्षरेतुस्वरोदयएवोक्तम् । " यदिनाम्नि भवेद्वर्णः संयुक्ताक्षरलक्षणः । ग्राह्यस्तदादिमोवर्णइत्युक्तं ब्रह्म यामलइति । [illegible]चाविशेषात्प्रथमोपरिस्थत्या चाद्यस्वरयुत एव

धोऽङ्घ्रिः सिंहस्त्वचरणत्रयम् ॥ हस्तश्चित्राम

कन्याचित्रोत्तरंदलम् । स्वातिभञ्चाविशाखाद्यचरण-

त्रितयंतुला ॥ तदन्त्याङ्घ्रचनुराधाख्यो ज्येष्ठाभंवृ-

श्चिकः स्मृतः । मूलंपूर्वोत्तराषाढाप्रागङ्घ्रिः कथितं

धनुः ॥ उत्तराङ्घ्रित्रयंकर्णोधनिष्ठाप्रथमंदलम् । म-

ग्राह्यः अत्र (शतपदचक्रे) बकारो वकारेणशकारः सकारेण तुल्ययोगक्षेमोमन्तव्यः । यथोक्तस्वरोदयएव । बवौशसौष खौचैवज्ञेयाविति परस्परमिति " । अस्यसवर्णावितिशेषः । अत्रषखयोः पृथक्श्रवणादग्रहणंबोध्यम् ॥ येतुवर्णा घादयो द्वादश शतपदचक्रेस्तम्भचतुष्कस्था आद्यस्वरमात्रयुता उक्ता-स्त अनुक्तैरपि शिष्टैःस्वर चतुष्टयैर्युताग्राह्याः । एवं स्वरोद-येशतपदचक्रोद्धारे "पञ्चस्वर समायोगादेकैकं पञ्चधाकुरु" इत्युक्तं तत्र "मातृकायां पुराप्रोक्ताः स्वराः षोड़शसंख्यकाः । तेषांद्वावन्तिमौत्याज्यौचत्वारश्च नपुंसकाः । शेषादशस्वरास्तेषु स्यादेकैकोद्विके द्विके । ज्ञेयाअतः स्वराद्यास्ते[illegible]राः पञ्चस्वरो-दये " इति मातृकास्वरचक्रोक्त्याऽकारादिपञ्च[illegible] स्वरेणाकारा-

धनिष्ठान्त्यंदलञ्चशततारका ॥ पूर्वभाद्र-
पादाद्यकुम्भस्तदन्त्यचरणस्तथा । उभाचरेवतीचैव मीन
राशिः प्रकीर्त्तितः ॥ अथताराविचारः ॥ जन्मभा-
द्गणयेदादौदिनधिष्ण्यावधिक्रमात् । नवभिश्चहरे-
द्भागं शेषंताराविनिर्दिशेत् ॥ जन्मसम्पद्विपत्क्षेम
प्रत्यरिः साधकोवधः । तथामित्रातिमित्रेचनवताराः

दिनां साम्यकथनाद-इ-उ-ए-ओ-इत्येतैरा-ई-ऊ-ऐ-औ-
इत्येतेऽपि ग्राह्याः । ऋकारादयश्चत्वारस्तु न पुंसका इत्यु-
क्त्या नामादिस्थिता अपि प्रथमोपस्थित(ऽ)स्वरेणैव समानयोग
क्षेमाः कार्या अविवक्षिता इति यावत् । व्यञ्जनमेवतदेकदेश-
भूतं संयुक्ताद्यक्षरवत्प्रथमस्वरयुतं तत्र ग्राह्यमितिपरमार्थः ।
यथा कृष्णलालनाम्नि ऋकारोऽविवक्षितः । अकारएव तत्र
विवक्षितः । एवमृद्धिनाथनाम्नि रेफएवाद्यस्वरयुतः कार्यः ।
तथाच कृष्ण ल लोमृगशिरसि तृतीयचरणावच्छेदेन लब्ध
जन्मा । ऋद्धि ाथश्च चित्रातृतीयचरणावच्छेदेनेति होरा
विदां सम्प्रदाय ॥

प्रकीर्त्तिताः ॥ द्विश्चतुः षट्नवाष्टम्यस्तारा .. यः शुभदाः सदा ॥ जनुर्विपत्प्रत्यरिश्चवधाख्या न शुभप्रदाः ॥ अथदुष्टताराशान्तिः । प्रत्यरौलवणंदद्याच्छाकंदद्या-त्रिजन्मसु । गुडंविपत्सितारायां निधनेतिलकाञ्चनम् ॥ अथचन्द्रशुभाशुभफलम् ॥ जन्मर्क्षेशुभदश्चन्द्रो द्वितीयेसुखदोभवेत् । तृतीयेधनसम्पत्तिश्चतुर्थेकलहप्रदः । पञ्चमेचार्थसम्पत्तिः षष्ठेधान्यधनागमः । सप्तमेराज-पूजास्यादष्टमेप्राणसंशयः । नवमेधर्म्मलाभः स्या-त्सिद्धिस्तुदशमेभवेत् । एकादशेजयोनित्यं द्वादशेमृ-त्युमादिशेत् ॥ शुक्लपक्षेद्वितीयस्तुपञ्चमोनवमः शुभः । कृष्णेबलवतीतारा शुक्लेपक्षेतथाशशी ॥ अथ दुष्टचन्द्रादिशान्तिः । चन्द्रेचशङ्खं(१)लवणंद्विजेभ्य-स्तारासुदुष्टासुतिथौचतण्डुलान् । धान्यञ्चदद्यात्कि

---

(१) शङ्खालाभे महत्स्वच्छतण्डुलं वानवंदधीति शिष्ट-परिगृहीतवचनामिहानुसन्धेयम् ॥ अत्रतारासुलवणमित्य-शक्ति विषयकंद्रष्टव्यन्तेन पूर्वोक्ताज्ञाविरोधः ।

लक्षकक्षयाग्रे देयास्तिलाएवमानिष्टलग्ने ॥ अथचन्द्रनिवासस्तत्फलञ्च ॥ मेषसिंहधनुषीन्द्रदिग्गतः कन्यकामकरगोषुदक्षिणे। द्वन्द्वकुम्भघटभृत्सुपश्चिमे कीटकर्कटझषेद्व्युदग्विधुः ॥ सम्मुखोऽर्थलाभाय दक्षिणेसुखसम्पदः। पृष्ठतोमरणञ्चन्द्रेवामचन्द्रेधनक्षयः(१)॥ अथचन्द्रवर्णवशात्फलम् ॥ अलौमेषसिंहेऽरुणोयुद्धकारीसितोगोवणिक्कर्कटर्क्षेषुसिद्धिः । धनुर्मीनयुग्मेषुपीतः शशीश्रीर्घटस्त्रीमृगाख्येषुकृष्णश्चमृत्युः ॥ अथ घातचन्द्रतिथिवारर्क्षाणि । जन्मे(२)न्दुनन्दार्कमघा-

---

(१) एतत्सर्वदिग्द्वारिनक्षत्रातिरिक्तविषयकमिति पीयूषधाराकृतः प्राहुः ॥

(२) अत्रविशेषः । पीयूषधारायाम् । युद्धेचैवविवादेच कुमारीपूजनेतथा । राजसेवावाहनादौ घातचन्द्रंविवर्जयेत् ॥ तीर्थयात्राविवाहान्नप्राशनोपनयादिषु । माङ्गल्यसर्वकार्य्येषु घातचन्द्रन्नचिन्तयेदिति । परमेतन्निर्मूलमित्यापिततैवाह ॥

श्चमेषे वृषेशनिः पञ्च(१)महस्तपूर्णाः । स्वातीचयुग्मे नवचन्द्रभद्राकर्केऽनुराधाबुधयुग्मभद्राः ॥ सिंहेजया षड्विजश्चमूलं पूर्णाशनिर्दिक्श्रवणः स्त्रियाञ्च । गुरुस्त्रिरिक्ताशतभंतुलायां नन्दालिकेरेवातिसप्तशुक्राः ॥ चापेचतुः शुक्रजयाभरण्यो मृगेऽष्टमोरोहिणिभौमरिक्ताः । कुम्भेजयार्द्रागुरुरुद्रघाता झषेभृगुश्चान्त्यभुजङ्गपूर्णाः ॥ अथस्त्रीणांघातचन्द्राः॥ मही(२)नागशैलाङ्कवेदाग्नितर्काः कराशाशिवाः पाण्डवाश्चित्रभानुः । कुरङ्गीदृशांघातचन्द्रास्त्वजादेर्नृनार्योः समंघाततिथ्यादिकं हि ॥ अथयोगिनीवासः ॥(३)पक्षतौचनवम्यांच पूर्वस्यांदिशियोगिनी । अग्निकोणेतृतीया-

---

(१) पञ्चमश्चन्द्रः । एवमुत्तरत्रापिबोध्यम् ॥

(२) अत्रसम्मतिवाक्यं मुहूर्त्तगणपतौद्रष्टव्यम् ॥

(३) अत्रबालबोधसारावलीकारः युद्धयात्रायांसम्मुखवामगा न शस्तेतिज्ञेयमित्याह पीयूषधाराकृतस्तु युद्धयात्रायामेव योगिनीविचार्य्यैत्यनुमनुते । पक्षतिः पक्षमूलं प्रतिपत् ॥

यामेकादश्याञ्चसास्मृता ॥ त्रयोदश्याञ्चपञ्चम्यां दक्षिणस्याञ्चयोगिनी॥ द्वादश्याञ्चचतुर्थ्यांञ्चानिर्ऋतेः कोणगामिनी ॥ चतुर्दश्याञ्चषष्ठ्याञ्च पश्चिमायाञ्चयोगिनी । पूर्णिमायाञ्चसप्तम्यां वायोः कोणेच योगिनी ॥ दशम्याञ्चद्वितीयायामुत्तरस्यांशिवप्रिया । ईशानकोणेचाष्टम्यां तथादर्शेचयोगिनी ॥ अथतत्फलम् ॥ योगिनीसुखदावामे पृष्ठेवाञ्छितदायिनी । दक्षिणेधनहन्त्रीचसम्मुखेमरणप्रदा ॥ अथ मासदग्धतिथयः ॥ मीने[१] चापे द्वितीयाच चतुर्थी वृषकुम्भयोः । मेषकर्कटयोः षष्ठी कन्यायांमिथुनेऽष्टमी ॥ दशमीवृश्चिकेसिंहे द्वादशीमकरे तुले । एता-

---

(१) अत्रविशेषः । मीनेकृष्णाद्वितीयाच पौषेशुक्लातथैवच । कुम्भेशुक्लाभवेद्दग्धा वृषेकृष्णाचतुर्थिका । वैशाखशुक्ला षष्ठीच कृष्णास्याच्छ्रावणेतथा । शुक्लाष्टमीतथाषाढे आश्विनेचसितेतरा । भाद्रेचशुक्लादशमी दग्धामार्गेसितेतरा । कार्तिकेद्वादशीशुक्ल ॥ माघेदग्धासितेतरा ॥ इति ॥

स्तु तिथयोदग्धाः शुभेकर्मणिवर्जिताः ॥ अथवार-
दग्धातिथयः ॥ द्वादश्यर्कयुताभवेन्नशुभदा सोमेनचै-
कादशी भौमेनापियुतातथैव दशमीनेष्टातृतीयाबुधे ।
षष्ठीनेष्टफलप्रदागुरुदिनेशुक्रे द्वितीयातथाऽरम्भे म-
ङ्गलकर्म्मणांनशुभदासूर्यात्मजे सप्तमी ॥ अथ तिथि
वारोत्थायोगाः। तत्रादौसिद्धियोगाः॥(१)शुक्रेनन्दाबुधे
भद्रा शनौरिक्ताकुजेजया । गुरौपूर्णाखिलेकार्येसिद्धि
योगाः शुभावहाः ॥ अथामृतयोगाः । चन्द्रार्कयो-
र्भवेत्पूर्णा कुजेभद्राजयागुरौ । शनिचन्द्रजयोर्न्नन्दा
भृगौरिक्ताऽमृताह्वया ॥ अथमृत्युयोगाः । नन्दासूर्ये
मङ्गलेच भद्राभार्गव चन्द्रयोः । बुधेजयागुरौरिक्ता श-
नौपूर्णामृतिप्रदा ॥ अथार्धप्रहराः ॥ रवौवर्ज्याश्चतुः
पञ्च सोमेसप्तद्वयन्तथा । कुजेषष्ठद्वयञ्चैव बुधेबाणतृ-
तीयकम् ॥ गुरौसप्ताष्टकञ्चैव शुक्रेवेदतृतीयकम् ।

---

(१) अत्रवशिष्ठः । सिद्धातिथिर्हन्ति समस्तदोषान्यामा-
सशून्यानपिमासदग्धान् ॥ दिनप्रदग्धानपि चान्यदोषानेका-
दशी यद्वदशेषपापानित्याह ॥

शनावाद्यन्तषष्ठञ्च प्रहरार्द्धं विगर्हितम्(१) ॥ रवौरसाब्धी हिमगौ हयाब्धी द्व्यंमहीजे विधुजे शरागौ(२) । गुरौशराष्टौ भृगुजेतृतीयं शनौरसाद्यन्त मितिक्षपायाम् ॥ अथयात्रायां शुभनक्षत्राणि(६)॥ अश्विनी रेवतीज्येष्ठा पुष्योहस्तः पुनर्वसू । मैत्रंमृगशि-

---

(१) अत्रोक्तंरत्नकलापे । अत्रार्द्धयामाः प्रथमाः काल-वेलाद्वितीयकाः । शुभावहेषुकार्येषुयत्नतः परिवर्ज्जयेदिति ॥

(२) शराश्वौ—इत्यपिपाठः । अगः पर्वतः । तथाच पञ्चम सप्तमावित्यर्थः ॥

(३) अत्रयात्रायां श्रेष्ठमध्यमाधमनक्षत्राण्याहवशिष्ठः । पौष्णद्वयादित्यकरेज्यमित्रमिन्दु हरिर्वासरभानियानि । श्रेष्ठानियात्रासु नवैवतानिमुक्त्वात्रिपञ्चादिमसप्तताराः । तिस्रोत्तरा वारुणनैर्ऋतेन्द्रपूर्वात्रयं ब्राह्मभयुग्दशैव । मध्यानिनेष्टान्यनलानिलेशाद्विदैवचित्राणि मघान्तकानि ॥ इति ॥ अर्थाद्रोहिणी चित्रा स्वाती श्रवण धनिष्ठा शतभिषा पूर्वात्रयानि मध्यमानि ॥

रोमूलं यात्रायामुत्तमाः स्मृताः ॥ अथाशुभभानि । भरणी कृत्तिका श्लेषा विशाखाचोत्तरात्रयम् । मघापशुपतिश्चैव यात्रायां मरणप्रदाः ॥ अथयमघण्टयोगः ॥ मघास्वाती रवौप्रोक्ता गुरौमूलञ्चरेवती । स्वाती च रोहिणीशुक्रे शतभंश्रवणाशनौ । पुष्योऽश्लेषातथासोमे भरणीमित्रभेकुजे । आर्द्रोत्तराफाल्गुनीच यमघण्टोबुधे बुधैः ॥ अथानन्दाद्यष्टाविंशतियोगाः । आनन्दः कालदण्डश्च धूम्राख्योऽथप्रजापतिः । सौम्योध्वांक्षोध्वजश्चैव श्रीवत्सोवज्रमुद्गरौ । क्षत्रं मित्रं मानसञ्च पद्माख्योलुंबकस्तथा । उत्पातमृत्यूकाणश्च सिद्धिश्चाथशुभोऽमृतः । मुशलंगदमातङ्गौ राक्षसाख्यश्चरस्थिरः ।वर्द्धमानश्चविज्ञेया योगानामसदृक् फलाः १)॥

---

(१) अत्रविशेषः । सिद्धि-मृत्यु-भयं-सौख्यं-शुभं-चारिष्टमेवच सिद्धिः शुभं-कलि-घातो-मनोवाञ्छितजंफलम् । सौख्यं-धनं-शुभंकर्म्म-हति-विघ्नं-मृतिस्तथा । धनक्षतिर्धनप्राप्तिः सर्वसौख्यंफलंभवेत् । शुभं-मानक्षयो-रोगो-वाहनञ्चाशुभंतथा । चालनं-तोपणं-वृद्धिरानन्दादेःक्रमात्फलम् ॥

अथैषांज्ञानप्रकारः॥ सूर्येऽश्विभात्तुहिनरोचिषिसौम्य धिष्ण्यात् सार्पाच्चभूमितनये शशिजे च हस्तात् । मैत्राद्गुरौभृगुसुतेखलुवैश्वदेवाच्छायासुते वरुणभात्क्रमशः स्युरेते ॥ अथ नक्षत्रवारोत्थामृतयोगाः ॥ आदित्यहस्तः सुरपूज्यपुष्यो बुधानुराधाशनिरोहिणी च । सितांशुसौम्यं कुजरेवती च शुक्राश्विनीचामृतयोग माहुः ॥ अथ शुभयोगाः । मूलंरवौपुष्यकरोत्तराणि वेधामृगाङ्कः श्रवणाचसोमे । कृशानुपुष्योत्तरभानि भौमे बुधेऽनुराधाव्वरुणः कृशानुः ॥ वृहस्पतौपुष्यपुनर्वसू च भगोश्विनी च श्रवणश्चशुक्रे । शनैश्चरेश्वातिपितामहौ च योगाः किलैतेशुभदायिनः स्युः ॥ अथमृत्युयोगाः॥ त्यजरविमनुरा(१)धंवैश्वदेवञ्च सोमे शतभिषमपिभौमे जन्द्रजे चाश्विनीञ्च । मृगशिरसि सुरेज्यं सर्वदेवञ्चशुक्रेरविसुतमपिहस्तेमृत्युयोगाभवन्ति ॥ अथ यमघण्टादिपरिहारः ॥ यमघण्टे त्यजे-

(१) अनुगताराधा (विशाखा) यस्मिन् तन्नक्षत्रे ।

दष्टौ मृत्यौद्वादशनाडिकाः । अन्येषुपापयोगेषु मध्याह्नात्परतः शुभम(१) ॥ अथ वारदिक्शूलम् ॥ पूर्वां शनौवह्निदिशन्नशीतगौ गुरौनयाम्यां न बुधे च नैर्ऋतीम् (२) । रवौप्रतीचीं भृगुजेनवायवीं गच्छेदुदीचीं नचमङ्गलेबुधे ॥ शनौचन्द्रेत्यजेत्पूर्वां दक्षिणाञ्चादि शंगुरौ । सूर्येशुक्रेपश्चिमाञ्च बुधेभौमेतथोत्तराम् ॥ अथ नक्षत्रदिक्शूलम् ॥ ज्येष्ठायान्नव्रजेदैन्द्रीं प्राग्भाद्रेन च दक्षिणाम् । नोत्तरां पूर्वफल्गुन्यां रोहिण्यां न च पश्चिमाम् ॥ अश्विन्यां दक्षिणान्नैव व्रजेद्धस्तेनचोत्तराम् । तथैन्द्रींन व्रजेन्मूले पुष्येचैव नपश्चिमाम् ॥ अथ सर्वादिग्गमन नक्षत्राणि ॥

---

(१) अत्रलल्लः । वारर्क्षतिथियोगेषु यात्रामेवविवर्जयेत् । विवाहादीनिकुर्वीतगर्गादीनां मतंवरम् ॥ इति ॥ अत्रानिन्द्येष्वितिशेषोबोध्यः ॥

(२) अत्रभृगुः । एकस्मिन्नापिदिवसेयदिचेद्गमनं प्रवेशश्च । प्रतिशुक्र वारशूले नचिन्तयेद्योगिनी पूर्ण ॥ इति ॥ अपिरेवार्थे । प्रवेशः पुनरागमनम् ॥

सर्वदिग्गमनेशस्तः पूषाश्वः श्रवणोमृगः । सर्वसिद्धिकरः पुष्योविद्यायां च गुरुर्यथा ॥ अथ यात्रायां विहितलग्नानि ॥ लग्नेकन्यामन्मथे च मकरेचतुलाधरे । यात्राचन्द्रबलेकार्य्या शकुन[१]ञ्चविचारयेत् ॥

---

(१) अथ शकुनम् । अग्रेधेनुः सवत्सा वृषगजतुरगादक्षिणा वर्त्तवह्निर्दिव्यस्त्रीपूर्णकुम्भो द्विजवरगणिका श्वेतमालापताका । मत्स्योमांसं घृतं वा दधि मधुसहितं काञ्चनं शुक्लवस्त्रं दृष्ट्वास्पृष्ट्वा पठित्वा फलमिह लभते मानवो गन्तुकामः ॥ इति । अत्र दर्शनं गवादेः, स्पर्शनं रत्नादेः । पाठश्च । मङ्गलंभगवान्विष्णुर्मङ्गलं गरुड़ध्वजः । मङ्गलं पुण्डरीकाक्षो मङ्गलायतनंहरिः ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः । येषामिन्दीवरश्यामोहृदयस्थो जनार्दनः ॥ वैन्यंपृथुं हैहयमर्जुनञ्च शाकुन्तलेयं भरतं नलंच । एतान्हियो वैस्मरसिप्रयाणे तस्यार्थसिद्धिः पुनरागमश्चेत्यादेः । अत्र शकुनान्तराणि ग्रन्थान्तरेषु द्रष्टव्यानि ॥

अथ यात्रायां वर्ज्यपदार्थाः ॥ जन्मतारेऽ[१]ष्टमेच-
न्द्रे संक्रान्तौ[२]सूर्यगेविधौ । भद्रागण्डान्तरिक्तासु
षष्ठ्यान्नैव व्रजेत्क्वचित ॥ द्वादश्यामपि चाष्टम्यां
न गच्छेत्प्रस्थितोऽपिसन्। जन्म[३]मासे नगन्तव्यं रा-
ज्ञाविजयमिच्छता ॥ अथ सर्वाङ्कज्ञानम् ॥ तिथिवा-
रञ्च नक्षत्रमेकीकृत्यत्रिधापुनः। द्वित्रिचतुर्भिर्गुणि-
तंरस सप्ताष्टभाजितम् ॥ आदिशून्ये भवेद्धानिर्म्म-

[१] जन्मनस्तारा यस्मिन्समयेतत्र ॥

(२) संक्रान्तिरिह पूर्वोत्तरयोर्मासान्तमासाद्योरप्युपल-
क्षणम्। रविदग्धं दिनत्रयमितिवचनात्। अत्र मेषतुल म-
कर कर्कटसंक्रमएव दिनत्रयं सर्वथात्याज्यमितरसंक्रमेषुतु
पूर्वोत्तराः (षोडश ८-८) घटिकास्त्याज्यास्तथाचोक्तं मु-
हूर्त्तचिन्तामणौ। विषुवायनेषुपरपूर्वपाश्चमान्दिवसान्त्यजेदि-
तरसंक्रमेषुच । घटिकास्तु षोड़श शुभक्रियाविधौ परतोऽपि
पूर्वमपिसन्त्यजेद्बुधः ॥ १ ॥ इति।

(३) अत्र "यो जन्ममासे क्षुरकर्म्मयात्रां कर्णस्यवेधं
कुरुतेहिमोहात्। मूढः सरोगी धनपुत्रनाशं प्राप्नोतिमूढं
निधनंतदानीमितिव्यासवचनाद्राजव्यतिरिक्तस्यब्राह्मणादेरपि
जन्ममासनिषेधोज्ञेयः। अत्र राज्ञोयात्रा नैव विशिष्यनिषेध-
त्क्षुरकर्मानुमतं प्रतिभाति।

ध्यशून्ये धरिद्रता । अन्त्यशून्ये भवेन्मृत्युः सर्वाङ्कको विजयीभवेत् ॥ अथ वाहनज्ञानम् ॥ तिथिवारञ्च नक्षत्रं नामाक्षरसमन्वितम् । नवभिश्चहरेद्भागं शेषंवाहनमुच्यते ॥ गर्द्दभस्तुरगोहस्ती मेषजम्बुकसिंहकाः । काकहंसमयूराश्च वाहनानि नवैवतु ॥ गर्द्दभेगञ्जनं याति तुरगोविजयावहः । हस्तिनासुखसंपत्तिर्मेषे मिष्टान्नभोजनम् ॥ जम्बुकोहिहरत्यायुः काकश्चकलहप्रदः । सिंहः शत्रुविनाशाय सिद्धिर्हंसमयूरयोः ॥ अथ नामग्रामवर्गयोर्मैत्र्यादिवशेन शुभाशुभविचारः ॥ अवर्गो गरुडोज्ञेयोबिड़ालः स्यात् कवर्गकः । चवर्गः सिंहनामास्याट्टवर्गः कुक्कुरः स्मृतः ॥ सर्पाख्यः स्यात्तवर्गोऽपि पवर्गोमूषकोमतः । यवर्गोगजनामास्यात्तथामेषःशवर्गकः । योयस्मात्पञ्चमः सस्याच्छत्रुस्तस्य नसंशयः । क्रमात्सिंहगजादीनां सुहृदोहृद्योतु(१)मूषकाः । स्व(२)वर्गेपरमाप्रीतिर्मित्रे प्रीतिश्चकथ्यते । उदासीनेप्रीतिरल्पा शत्रुवर्गेमृतिर्भवेत् ॥ अथवासयो-

---

(१) ओतुर्बिड़ालोमार्जार इत्यमरः । (२) अत्रोक्तंरत्नकलापे । वासः पुरेराशिग्रामे सेव्यसेवकयोरपि । बलाबलंच युद्धादौवर्गतः परिचिन्तयेत् ॥ इति । दिशिदेशे ॥

ग्यायोग्यग्रामज्ञानम् ॥ अक्षरं द्विगुणीकृत्यमात्रां कृत्वाचतुर्गुणाम् । पुंनामग्रामयोरैक्यं कृत्वासप्तविभाजितम् ॥ खैकाब्धिशेषेहानिः स्यान्मध्यमंत्रिकपञ्चमे। द्विषष्ठेसर्वसम्पत्तिर्भवतीति न संशयः॥अथकाकिनीविचारः॥स्व(१)वर्गं द्विगुणीकृत्यपरवर्गेण योजयेत्।अष्टभिश्चहरेद्भागं योधिकः सऋ(२)णी भवेत् ॥ अथ वर्गाणां शराङ्काः । अ-क-च-ट-त-प-य-श८वर्गाः पूर्वादीनां दिशांज्ञेया । तेषांवसु ८ शर ५ रस ६ जल ४ गिरि ७ शशि १ गुण ३ वाहवः २ क्रमादङ्काः ॥ अथ दशाप्रकारः । अवर्गादिशरैः संख्यां नामग्रामदिशामयीम्।नागैर्भागं समाहृत्यशेषं गृहदशारवेः(३)॥ अथ तत्फलम् । शुभानाञ्चदशाशस्ता (४)पापानामशुभा स्मृता ॥ अथ राहुसंमुखत्वेन द्वारनिषेधः ॥ अलि-

---

(१) अत्र (काकिन्यादौ) नामराशिरेवग्राह्यः । तथाचोक्तम् । काकिन्यांवर्गशुद्धौच वादेद्यूतेस्वरोदये । मन्त्रे पुनर्भूवरणे नाम राशे प्रधानतेति ॥ (२) ग्रामस्य ऋणित्वं—शुभं, पुंसोऽशुभमूलाभावात् । (३) उक्तञ्च—गज—शर—र्तु—युगा—श्व—मही गुणाद्विसहिता मघवादिदिशिक्रमात्। गृहपतेरसिधापुरादिङ्मिता वसुहृ ताभवनस्य दशाभवेत् ॥ इति ॥

(४) पापा-रविकुजशनि राहवोरत्नकलापादौ तथादर्शनात् ॥

धनुमकरार्के राहुरास्तेच पूर्वेसघटश(१)फरमेषे दक्षिणे दिग्विभागे । वृषमिथुनकु(२)लीरे पश्चिमेदिग्विभागे हरियुवतितुलायां चोत्तरेसैंहिकेय:(३)॥ यस्यां दिशि-यदाराहुः स्थितोलोकभयंकरः । तस्यान्दिशितदा-द्वारं नकर्त्तव्यं मनीषिभिः ॥ यदिकश्चिज्जनस्तस्यां द्वारञ्चकुरुतेक्रमात् । तदामुख्यजनोगेहे विनाशमुप गच्छति ॥ अथवृषवास्तुच क्रोद्धारः ॥ सूर्याक्रान्तात्त्य जेत्सप्त ततश्चैकादशेशुभम् । शेषंनन्दर्क्षकं दुष्टमिति वास्तुनिर्कीर्त्तितम् ॥ अथ हलचक्रोद्धारः ॥ त्रिभिस्त्रि भिस्त्रिभिः पञ्चात्रिभिः पञ्चत्रिभिस्त्रिभिः। सूर्यभा(४)-द्दिनभं यावद्धानिवृद्धी हलेक्रमात् ॥ अथ तृणरज्जुभि-र्बीजबन्धनम् ॥ हस्तद्वयाच्युतयुगेऽदितितोयनाथे मैत्रेगुरौ कमलजोत्तरचन्द्रपौष्णे । कृत्तांबुधेज्य भृगुजे षाविहाय कुर्याद्बीजस्य बन्धनविधिस्थिर भेगुहस्थः ॥ मार्गेमाघे फाल्गुने च धान्यानां बीजबन्धनम् कर्त्तव्यं पर्वषष्ठीं च भद्रांत्यक्त्वा च सूरिभिः ॥

इति पालिवंशाब्धिचन्द्र मैथिल पं० श्रीकलाधर शर्म्मणा विरचितः शिशुबोधः समाप्त ॥

रसतर्करत्नभू- (१९६६) मितसमासु सुदि वैक्रमीषु मधौ । करम हवंशाम्बुधिचन्द्रोऽप्यालिखन्मुकुन्दोऽदः ॥ १ ॥

---

(१) शफरोमीनः (२)कुलीरःकर्कटकः।(३)राहुः।(४)सूर्य-भात्सूर्योज्झितभात् । रत्नमाला मुहूर्त्ततत्वादौ तथा दर्शनात् ॥

अथ शुद्धि पत्रम् ।

पृष्ठ	पंक्ति	अशुद्धम्	शुद्धम्
१	१२	वंसु:	वंसू
४	१६	सचा० ग्राह्यः	अयंप्रमादपातितः

जाहिरात ।

विदित हो कि दरभंगा राजधानीके नईबाजारमें मोतीराम रामेश्वरलालने एक "श्रीकामेश्वर" नाम का यन्त्रालय (छापाखाना) करीव एक वर्षसे स्थापित की है जिसके द्वारा संस्कृत तथा हिन्दी-मिथिला-और राष्ट्र-भाषा (इङ्ग्रेजी) में उत्तमोत्तम पुस्तक वो रसीद आदि क के फार्म ठीक समय पर खास मुम्बई की खेमराज श्री कृष्णदास के यहां के नवीन टाइपोंमें छपकर प्रकाशित होता है ।

जिनमहाशयों को अपेक्षित होय उक्त स्थानमें किफायत साथ ठीक समय पर छपवाय सकते हैं इति ।

विशेष सूचना ।

आज कल्ह संस्कृत पाठी विद्यार्थियों में से संस्कृत में संभाषण (बोल चाल) तथा भाषान्तर करने वाले बहुत कम पाये जातेहैं इस्का निदान शोचकर संस्कृत प्रवेशिका नामके पुस्तक तीन भागमें विभक्त करके त्याराकया गयाहै जिसके द्वारा संस्कृत हिन्दी तथा मिथिला भाषा में परस्पर अनुवाद वो सस्कृतमें संभाषण करना अति सुगम होगया है।

मूल्य प्रथम भाग का फुटकर =)॥ इकठे १०) रु० शैकड़ा वो द्वितीय भागका ≡)॥। इकठा १५) रु० शैकड़ा तृतीय भाग छपनेको है जिसमें हिन्दी तथा मिथिला दोनोंभाषाओंका व्याकरण सरल सुबोध रीति से वर्णितहै ॥ इति ॥